**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 12 Issue 12 December- 2022
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# रामायणे सामाजिकशैक्षिकतत्त्वानि

**डॉ. सच्चिदानन्दमूर्तिः**
**सहायकाचार्यः, शिक्षाविभागः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

## उपोद्घातः

संस्कृतवाङ्मये आदिकाव्यं भवति रामायणम्। महाकविना वाल्मीकिना रचितग्रन्थ: रामायणं सर्वेषु कालेषु महाद्रुमतया स्थास्यत्येव। अस्मिन् महाकाव्ये चतुर्विंशतिसहस्राणि श्लोकाः सप्तकाण्डेषु विभक्ताः सन्ति।

रामायणे आदिकविना चित्रितानां चरित्राणां महत्त्वं सामाजिकशैक्षिकमूल्यबोधाय विचारयितुं शक्यते। रामायणे सर्वविधविषया: उपस्थापिता:। सामाजिकमूल्यानि संवर्धनाय रामायणे चित्रितानि चरित्राणि एव प्रत्यक्ष उदाहरणानि भवन्ति । एवञ्च शैक्षिकसम्बद्धतत्त्वानि अपि प्रतिपादितानि।

## सामाजिकतत्त्वानि

समाजशिक्षायै अस्याः गुरुत्वपूर्णभूमिका विद्यते। आधुनिककाले बहुविध शब्दजालं दृश्यते। यथा- सकलमानवसौभ्रातृत्वं, विश्वपौरसत्वं, मानव आत्मगौरवं, सामाजिकस्पृहा, मानवतावादः। परन्तु कुत्रापि सामाजिकजीवने एतान् न पालयन्ति जनाः। यदि पृच्छामः चेत् उत्तरं नैव भवति। परन्तु एतेषां प्रश्नानां समाधानं रामायणे द्रष्टुं शक्यते। उपरियुक्तविषयाः रामायणे दृक्गोचरा: भवन्ति।

**"सन्मार्गमतिरिच्य कदापि न गन्तव्यम्"** इति वार्ता प्रकाशयितुं वाल्मीकिना विभीषणचरित्रस्य उपस्थापनं कृतम्। कुमार्गगामिनः रावणं परित्यज्य सन्मार्गगामिन: रामचन्द्रस्य शरणागतोऽभवत्। अत्र सामाजिकान् उद्दिश्य कविः प्रकाशयति यत् **"गतेषु प्राणेषु अपि सन्मार्गात् मा प्रमदितव्यम्"** इति।

त्यागस्य चरमपराकाष्ठां प्रदर्श्य सुमित्रायाः चरित्रमुपस्थापयति महर्षिः। वनवासाय प्रस्तुतस्य ज्येष्ठभ्रातु: रामचन्द्रस्य अनुगमनाय दृढनिश्चय: लक्ष्मण: मातुः आशिषं यदा याचते तदा महनीया धर्मप्राणा सुमित्रा कनिष्ठभ्रातुः धर्मं तस्मै कथयति-

**रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।**
**अयोध्यामटवीं विद्धि गच्छ तात यथा सुखम्।।**

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 12 Issue 12 December- 2022
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

इयमेव महनीयभारतीयपरम्परा समाजसुरक्षायै अद्यापि नितरामावश्यकी। लक्ष्मण: रामचन्द्रस्य प्रियभ्राता, सखा तथा च सहचर: आसीत्। ज्येष्ठमातुः रामस्य कृते आत्मानं पूर्णतया समर्पितवान्। विश्वामित्रस्य यज्ञरक्षात् प्रारभ्य सरयूकूले विसर्जनं यावत् शरीरे आत्मवत् अतिष्ठत्। लक्ष्मण: आदर्शभ्राता आसीत्। स रामे पितृत्वं सीतायां च मातृत्वं दृष्टवान्। यथा रामे अचलाभक्ति: तथा सीतायामपि। वनवासकाले सीताया: पदवन्दनमेव लक्ष्मणस्य मुख्यं कार्यमभवत्। सुग्रीवः यदा सीतायाः अलङ्कारान् रामाय प्रायच्छत् तदा तु रामचन्द्र: अलङ्काराणां ज्ञानाय लक्ष्मणस्य समीपे अस्थापयत्। तदा लक्ष्मण: नूपुरमतिरिच्य नान्यान् ज्ञातुं पारयामीति उक्तवान्। यथा-

**नाहं जानामि केयूरं नाहं जानामि कुण्डलम्।**
**नूपुरे त्वेव जानामि नित्यं पादाभिवन्दनात्।।**

रामलक्ष्मणयोः प्रीतिविषये अशोकवने हनुमन्तं सीता अवदत्। भगवान् रामचन्द्रः मत् लक्ष्मणमधिकं प्रीणातीति यथा-

**मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः।।**

भ्रातृप्रीते: चरमं निदर्शनं रामलक्ष्मणयोः प्रेमभावः। युद्धक्षेत्रे लक्ष्मणस्य विषये रामः

एवं अवदत्।

**देशे देशे कलत्राणि देशे देशे च बान्धवाः।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः।।**

भगवत: रामचन्द्रस्य पूजनकाले सीतालक्ष्मणभ्यां सह हनुमत: पूजनमेकस्मिन्नेव पीठे क्रियते। तत्रायं निष्कर्षः यत् भ्राता, प्रिया, मित्रं च एकस्य सफलपुरुषस्य सामाजिकजीवने उत्कर्षकारिणः भवन्ति।

**यद्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत्।**
**नाहं तत् प्रतिगृह्णीयां भक्ष्यान्विषकृतानिवा।।**

अनेन श्लोकेन अधुनातन राजकीयनेतृणां कृते सुष्ठु उपदेश: दीयते। इदानीम् आधुनिकजना: लक्ष्यप्राप्तिः न भवति चेत्, निराश: भूत्वा आत्मदाहार्थं प्रयास: कुर्वन्ति। परन्तु रामायणं एवं न कथयति। यथा-

**‘विनाशो बहवो दोषा जीवन् प्राप्नोति भद्रकम्’।**

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 12 Issue 12 December- 2022
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

आधुनिकसमाजे देशभक्तिभावना जनेषु निद्रावस्थायां वर्तते। देशभक्तिभावनां जागरितुं रामायणे मार्जितमार्गदर्शनं विहितम्। यथा-

**“अपि स्वर्णमयी लङ्कान मे रोचते लक्ष्मण।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसि”।।**

## शैक्षिकतत्त्वानि-

रामायणं शैक्षिकतत्त्वानाम् आधारभूतग्रन्थः भवति। रामायणे बहूनि शैक्षिकतत्त्वानि दृश्यन्ते।

## गुरो: महत्त्वम्-

**अद्य प्राप्ता तपसद्धिस्तव संदर्शनान्मया।**
**अद्य मे सफलं तप्तं गुरवश्च सुपूजिताः।।**

अस्मिन् श्लोके गुरो: महत्त्वं द्रष्टुं शक्यते।

## गुरुशिष्यसम्बन्धः-

रामायणे बालकाण्डे वसिष्ठमहर्षिणा योगवासिष्ठम् इत्यादि ग्रन्थाः सैद्धान्तिकरूपेण पाठिताः। यद् रामेण अधीतं तत् विश्वामित्रेण प्रयोगं कृतम्। गुरो: वचनानुसारेण सीतास्वयंवरे धनुर्भङ्गं कृत्वा सीतां परिणीतवान्। गुरुशिष्यसम्बन्धः दृढः आसीत् इति वक्तुं श क्नुमः। लङ्कायां छद्मवेशं स्वीकृत्य भ्रमणकाले हनुमान् बहुषु स्थानेषु वेदपाठं श्रुतवान्। लङ्काधिपतिः रावण: सकलशास्त्रेषु पण्डितः आसीत्। स्वीकृतेन एव सीतायाः सविधे स्वाभिमतं प्राकटयत् इति हनुमतः वाक्यात् ज्ञायते।

## उद्देश्यानि-

शिक्षणोद्देश्येषु अन्यतमं उद्देश्यं भवति चारि त्रिकविकास:। रामचरित्रपठनेन चारित्रिकविकासः स्पष्टं अवगम्यते। रामायणे चित्रितानि चरि त्रानि सर्वाण्यपि चारित्र्यकविकासभूतानि भवन्ति।

## पाठ्यक्रमः-

**नानृग्वेद विनीतस्य नायजुर्वेदधारिणः।**
**नासामवेदविदुषः शक्यमेवं विभाषितुम्।।**

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 12 Issue 12 December- 2022
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

य: सम्पूर्णं ऋग्वेदं, यजुर्वेदं, सामवेदान् न जानाति सः एवं पाण्डित्यपूर्णं वाक्यं वक्तुं न शक्नोति अर्थात् हनुमान् सर्ववेदज्ञः इत्यर्थः। अस्मान् किं ज्ञायतेत्युक्तौ तदानीन्तनकाले पाठ्यक्रमस्य गभीरतां ज्ञातुं शक्नुमः।

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**
**बहुव्याहरताऽनेन न किञ्चिदपशब्दितम्।।**

अर्थात् हनुमान् सम्पूर्णव्याकरणं बहुवारं पठितवान्। अतएव सः एतावत्कालपर्य न्तं बहु किमपि उक्तवान् परन्तु न एकस्यापि अपशब्दस्य प्रयोगं कृतवान् इति रामः कथयति। अस्मात् किं ज्ञायते अनेन हनुमता व्याकरणशास्त्रं सम्यक् अधीतम् इति।

पुन: रामचन्द्र: चित्रकूटपर्वते पर्णशालानिर्माणानन्तरं वास्तुशमनविषये सम्यक् विवेचितवान् अस्मात् राम: सर्वशास्त्रेषु निष्णाता इति तस्य शकुनशास्त्रज्ञान-वास्तुशास्त्रज्ञानाभ्यां प्रतीयते। पुन: सीता विषये हनुमान् वानरैः साकम् इत्थं ब्रवीति यथा-प्रतिपत्तिथौ विद्याध्ययनं क्रियते चेत् सा विद्या यथा कृषा भवति तथैव सीताऽपि भासते।

## सम्प्रेषणोपागम:-

**न मुखे नेत्रयोश्चापि ललाटे च भ्रुवेस्तथा।**
**अन्येष्वपि च सर्वेषु दोष: संविदित: क्वचित्।।**

अर्थात् हनुमान् एतावत्कालपर्यन्तं बहु किमपि भाषितवान् परन्तु अस्य न कस्मिश्चित् अङ्गे न कश्चन दोषः दृष्टः इति। अत: हनुमान् शिक्षाशास्त्रं सम्यक् जानातीत्यर्थः। अतः किं ज्ञायते **“सम्प्रेषणकौशलं”** कथं भवेदिति ज्ञातुं शक्नुमः।

## भाषणकौशलम्-

**अविस्तरमसंदिग्धमविलम्बितमव्ययम्।**
**उर: स्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम्।**

अस्मिन् श्लोके वाक्यकौशलस्य महत्त्वं प्रतिपादितम्। वाक्यकौशलम् कथमिति ज्ञातुं शक्नुमः। हनुमान् यद् यद् वाक्यं प्रयुक्तवान् तत् वाक्यं बहुविस्तरं नास्ति सन्देहरहितं वर्तते। बहुद्रुतम् अपि न उच्चारितं किञ्च श्रोतॄणां व्यथादायकं नास्ति, अपि च मध्यमस्वरेण प्रयुक्तं वर्तते इति। अनेन भाषणकौशलोपायान् ज्ञातुं शक्नुमः। अस्मात् **“भाषणकौशलज्ञानमा”** सादयितुं शक्यते।

**अनया चित्रया वाचा विस्थानव्यञ्जनस्थया।**

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 12 Issue 12 December- 2022
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**कस्य नाराध्यते चित्तमुद्यतासेररेरपि।।**

अस्मिन् श्लोके वा क्कौशलस्य महत्त्वं प्रतिपादितम्। वाक्कौशलं कथमिति ज्ञातुंसा वाक् वक्षः कण्ठशिरसु त्रिषु स्थानेषु उच्चारिता, तस्मात् सा वाक् आश्चर्यजनिका वर्तते, असिंधृत्वा मारयितुं प्रवृत्तं शत्रुं प्रति एवं विधा वाक् प्रयुज्यते चेत् स शत्रुः अपि सन्तुष्टः भवति इति।

**उपसंहार:-**

रामायणे क्वचिद् दर्शनानां, क्वचिद् उपनिषदाम्, क्वचिद् स्मृतीनां, क्वचिद् विज्ञानस्य, क्वचिद् शैक्षिकमनोविज्ञानस्य तत्सम्बद्धा उपयोगिनो विषया: उपलभ्यन्ते। अतएव रामायणं लोकप्रियत्वम् आवहितम्।

**यावत् स्थाष्यन्ति गिरयः सरितश्च महीतले।**
**तावद् रामायण कथा लोकेषु प्रचरिष्यति।।**

इति दिक्।